तिभिः” इति। गौणकालेऽप्यसम्भवे यमः “दिवोदितानि कर्माणि प्रमादादकृतानि चेत्। शर्वर्य्याः प्रथमे यामे तावत् कुर्य्याद्यथाक्रमम्”। अत्र मुख्यकालानुरोधात् सायंसन्ध्योपासनं पूर्वं कृत्वा “आगन्तूनामन्ते निवेशः” इति न्यायेनातीतकालं कर्म पश्चात् कार्य्यमिति न्यायतः प्राप्तं तस्य निषेधार्थं यथाक्रममिति वचनमिति। “दिवोदितानि कर्माणि प्राप्नुवन्तीतराणि च। दिवोदितानि कृत्वैव विदध्यादुत्तराणि तु” मदनपरिजाते वशिष्ठोक्तेः। सूतके विशेषः मृतके इत्यनुवृत्तौ “अवगाहं ब्रह्मयज्ञं सौरजप्यञ्च वर्जयेत्” इति “स्नानं सन्ध्यां त्यजन् विप्रः सप्ताहाच्छूद्रतां व्रजेत्। तस्मात् स्नानञ्च सन्ध्याञ्च सूतकेऽपि न सन्त्यजेत्। सूतके मृतके चैव सन्ध्याकर्म समाचरेत्। मनसोच्चारयेन्मन्त्रान् प्राणायामकृते द्विजः” इत्यनयोरविरोधाय न मानससन्ध्यानिषेध इति कल्प्यम्। किन्तु प्राणायाममन्त्रा मनसापि नोच्चार्य्या इत्यर्थः। पैठिनसिस्तु “मृतके सावित्र्याञ्जलिं प्रक्षिप्य प्रदक्षिणं कृत्वा सूर्य्यं ध्यायन्नमस्कुर्य्यात्” इत्यर्घ्यदानान्तां सन्ध्यामाह। अन्ये तु उच्चार्य्य वाचा गायत्रीं दद्यादर्घ्याञ्जलीनपि। अष्टविंशतिकृत्वोऽत्र गायत्रीं मनसा जपेत्” इति गायत्रीजपमप्याहुः। “मृतके कर्मणान्त्यागः सन्ध्यादीनां विधीयते” इति यद्यपि सन्ध्यायानिवृत्तिः श्रूयते तथाप्यञ्जलिप्रक्षेपादिकं कार्य्यम्। “मृतके सावित्र्या चाञ्जलिम्प्रक्षिप्य प्रदक्षिणं कृत्वा सूर्य्यं ध्यायन्नमस्कुर्य्यादिति” पैठिनसिस्मरणात् इति मिताक्षरा सन्ध्यादीनामप्यपवादमाहापरार्के पुलस्त्यः “सन्ध्यामिष्टिं चरुं होमं यावज्जीवं समाचरेत्। न त्यजेत् सूतके वापि त्यजन् गच्छेदधो द्विजः। सूतके मृतके चैव सन्ध्याकर्म समाचरेत्। मनसोच्चारयेन्मन्त्रान् प्राणायामकृते द्विजः” ?। यत्तु चन्द्रिकायां जावालः “सन्ध्यां पञ्च महायज्ञान् नैत्यिकं स्मृतिकर्म च। तन्मध्ये हापयेत्तेषां दशाहान्ते पुनः क्रिया” यच्च संवर्त्तः “सूतके कर्मणां त्यागः सन्ध्यादीनां विधीयते” यच्च विष्णुपु० “सर्वकालमुपस्था तु सन्ध्ययोः पार्थिवेष्यते। अन्यत्र सूतकाशौचविभ्रमातुरभीतितः” इति। तत् संपूर्णसन्ध्यानिषेधपरम्। “अर्घ्यान्ता मानसी सन्ध्या कुशवारिविवर्जिता” इति शुद्धिदीपे च्यवनोक्तेः। पैठीनसिस्त्वत्र मन्त्रोच्चारणमप्याह” सूतके सावित्र्याञ्जलिं प्रक्षिप्य सूर्य्यं ध्यायन्नमस्कुर्य्यात्”। प्रयोगपरिजाते भरद्वाजोपि “सूतके मृतके कुर्य्यात् प्राणायाममन्त्रकम्। तथा मार्जनमन्त्रांस्तु मनसोच्चार्य्य मार्जयेत्। गायत्रीं सम्यगुच्चार्य्य सूर्य्यार्घ्यं निवेदयेत्। मार्जनं तु न वा कार्य्यमुपस्थानं न चैव हि”। इत्येवं मिताक्षरापरिजातादौ अशौचे सन्ध्याकरणविशेषस्योक्तेः गौड़ानां तदनाचरणमनाचार एव तस्य श्रौतत्वेन श्रुत्या बाधानुचितत्वादपि मिताक्षराद्युक्तं युक्तमिति द्रष्टव्यम्।

**प्रातःसवन** न० सवनं यज्ञाङ्गकर्मभेदः सोमाभिषवादि प्रातः कर्त्तव्यम् सवनम्। प्रातःकर्त्तव्ये यज्ञाङ्गकर्मभेदे। अप्र प्रातःसव तत्रार्थे पु०।

**प्रातःस्नान** ७त०। प्रातःकर्त्तव्ये जलावगाहनादिरूपे स्नाने तस्य कर्माङ्गताद्युक्तं गरुड़पु० “जपः काले तु संप्राप्ते कृत्वा चावश्यकं बुधः। स्नायान्नदीषु शुद्धासु शौचं कृत्वा यथाविधि। प्रातःस्नानेन पूयन्ते येऽपि पापकृतो जनाः। तस्मात् सर्वप्रयत्नेन प्रातःस्नानं समाचरेत्। प्रातःस्नानं प्रशंसन्ति दृष्टादृष्टशुभं हि तत्। सुखसुप्तस्य सततं लालाद्याः संस्रवन्ति हि। अतो नैवाचरेत् कर्माण्यकृत्वा स्नानमादितः। अलक्ष्मीः कालकर्णी च दुःस्वप्नं दुर्विचिन्तितम्। प्रातःस्नानेन पापानि धूयन्ते नात्र संशयः। न च स्नानं विना पुंसां प्राशस्त्यं कर्म संस्मृतम्। होमे जप्ये विशेषेण तस्मात् स्नानं समाचरेत्। अशक्तावशिरस्कन्तु स्नानमस्य विधीयते”।

**प्रातःस्मरणीय** त्रि० ७त०। प्रातःकीर्त्तनीये देवादौ पुण्यचरिते। प्रभातशब्दे ४४७५ पृ० दृश्यम्।

**प्रातर्** अव्य० प्र+अत–अर। १प्रभाते अमरः “प्रातःकालो मुहूर्त्तां स्त्रीनि”ति स्मृत्युक्ते २सूर्य्योदयावधित्रिमुहूर्त्तकाले च

**प्रातर** त्रि० प्रकृष्ट आतरो यत्र। प्रकृष्टातरहूपतरणपण्ययुक्ते देशे ततः कृशाश्वा० चतुरर्थ्यां छण्। प्रातरीय तस्यादूरदेशादौ त्रि०।

**प्रातरचक** पु० सर्पभेदे भा० आ० ५७ अ०।

**प्रातरनुवाक** पु० प्रातःपाठ्ये अनुवाके वेदांशभेदे मन्त्रे “प्रातरनुवाकं जाग्रदुपासीत” कात्या० श्रौ० ८।१।१९ “पुरा प्रातरनुवाकस्य” छा० उ० “प्रातरनुवाकस्य प्रारम्भात्” भा० “अप्रगीतमन्त्रगणजातं शस्त्रं यत् प्रातःकाले शस्यते प्रातरनुवाकस्तस्येति यावत्” आनन्द०। [त्रिका०

**प्रातराश** पु० अश+भावे घञ् ७त०। प्रातःकालिके भोजने

**प्रातर्गेय** पु० प्रातर्गेयमस्य। १स्तुतिपाठके त्रिका० २प्रातःकाले गातव्ये सामादौ च त्रि०।